# Rudrakavacham

# રુદ્રકવચમ્

## Document Information

Text title : Rudra Kavacham

File name : rudrakavach.itx

Category : kavacha, shiva

Location : doc_shiva

Transliterated by : K. Sree Hari

Proofread by : K. Sree Hari, NA, Ruma Dewan

Description-comments : Although this is said to be from Skanapurana, we do not know its location in print.

Latest update : January 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2024

*sanskritdocuments.org*

# રુદ્રકવચમ્

॥ અથ શ્રી રુદ્રકવચમ્ ॥

ૐ અસ્ય શ્રીરુદ્રકવચસ્તોત્રમહામન્ત્રસ્ય
દુર્વાસા ઋષિઃ । અનુષ્ટુપ્છન્દઃ । ત્ર્યમ્બકરુદ્રો દેવતા ।
હ્રાં બીજમ્ । શ્રીં શક્તિઃ । હ્રીં કીલકમ્ ।
મમ માનસાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

હ્રામિત્યાદિ ષડ્દીર્ઘૈષ્ષડઙ્ગન્યાસઃ ॥

॥ ધ્યાનમ્ ॥

શાન્તં પદ્માસનસ્થં શશિધરમકુટં પઞ્ચવક્ત્રં ત્રિનેત્રં
શૂલં વજ્રઞ્ચ ખડ્ગં પરશુમભયદં દક્ષભાગે મહન્તમ્ । (દક્ષિણાઙ્ગૈર્વહન્તમ્)
નાગં પાશં ચ ઘણ્ટાં પ્રલય હુતવહં સાઙ્કુશં વામભાગે (ઘણ્ટાં ડમરુકસહિતં)
નાનાલઙ્કારયુક્તં સ્ફટિકમણિનિભં પાર્વતીશં નમામિ ॥ (નાનાલઙ્કારદીપ્તં)

॥ દુર્વાસા ઉવાચ ॥

પ્રણમ્ય શિરસા દેવં સ્વયમ્ભું પરમેશ્વરમ્ ।
એકં સર્વગતં દેવં સર્વદેવમયં વિભુમ્ ॥ ૧॥ (એવં)

રુદ્રવર્મ પ્રવક્ષ્યામિ અઙ્ગપ્રાણસ્ય રક્ષયે ।
અહોરાત્રમયં દેવં રક્ષાર્થં નિર્મિતં પુરા ॥ ૨॥

રુદ્રો મે ચાગ્રતઃ પાતુ પાતુ પાર્શ્વૌ હરસ્તથા ।
શિરો મે ઈશ્વરઃ પાતુ લલાટં નીલલોહિતઃ ॥ ૩॥

નેત્રયોસ્ત્ર્યમ્બકઃ પાતુ મુખં પાતુ મહેશ્વરઃ ।
કર્ણયોઃ પાતુ મે શમ્ભુર્નાસિકાયાં સદાશિવઃ ॥ ૪॥

વાગીશઃ પાતુ મે જિહ્વામોષ્ઠૌ પાત્વમ્બિકાપતિઃ ।
શ્રીકણ્ઠઃ પાતુ મે ગ્રીવાં બાહૂચૈવ પિનાકધૃત્ ॥ ૫॥

હૃદયં મે મહાદેવ ઈશ્વરોઽવ્યાત્સ્તનાન્તરમ્ ।
નાભિં કટિં ચ વક્ષશ્ચ પાતુ શર્વ ઉમાપતિઃ ॥ ૬॥

બાહુમધ્યાન્તરં ચૈવ સૂક્ષ્મરૂપસ્સદાશિવઃ ।
સર્વં રક્ષતુ મે શર્વો ગાત્રાણિ ચ યથા ક્રમમ્ ॥ ૭॥

વજ્રં ચ શક્તિદં ચૈવ પાશાઙ્કુશધરં તથા ।
ગણ્ડશૂલધરાન્નિત્યં રક્ષતુ ત્રિદશેશ્વરઃ ॥ ૮॥

પ્રસ્થાનેષુ પદે ચૈવ વૃક્ષમૂલે નદીતટે ।
સન્ધ્યાયાં રાજભવને વિરૂપાક્ષસ્તુ પાતુ મામ્ ॥ ૯॥

શીતોષ્ણાદથ કાલેષુ તુહિનદ્રુમકણ્ટકે ।
નિર્મનુષ્યે સમે માર્ગે પાહિ માં વૃષભધ્વજ ॥ ૧૦॥

ઇત્યેતદ્રુદ્રકવચં પવિત્રં પાપનાશનમ્ ।
મહાદેવપ્રસાદેન દુર્વાસોમુનિકલ્પિતમ્ ॥ ૧૧।
મમાખ્યાતં સમાસેન ન ભયં તેન વિદ્યતે । (વિન્દતિ)
પ્રાપ્નોતિ પરમારોગ્યં પુણ્યમાયુષ્યવર્ધનમ્ ॥ ૧૨॥ (વરમારોગ્યં)
વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ ।
કન્યાર્થી લભતે કન્યાં ન ભયં વિન્દતે ક્વચિત્ ॥ ૧૩॥

અપુત્રો લભતે પુત્રં મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ।
ત્રાહિ ત્રાહિ મહાદેવ ત્રાહિ ત્રાહિ ત્રયીમય ॥ ૧૪॥

ત્રાહિ માં પાર્વતીનાથ ત્રાહિ માં ત્રિપુરાન્તક ।
પાશં ખટ્વાઙ્ગદિવ્યાસ્ત્રં ત્રિશૂલં રુદ્રમેવ ચ ॥ ૧૫॥

નમસ્કરોમિ દેવેશ ત્રાહિ માં જગદીશ્વર ।
શત્રુમધ્યે સભામધ્યે ગ્રામમધ્યે ગૃહાન્તરે ॥ ૧૬॥

ગમનેઽગમને ચૈવ ત્રાહિ માં ભક્તવત્સલ ।
ત્વં ચિત્વમાદિતશ્ચૈવ ત્વં બુદ્ધિસ્ત્વં પરાયણમ્ ॥ ૧૭॥ (ચિત્વં ત્વં માનસં ચ)

કર્મણા મનસા ચૈવ ત્વં બુદ્ધિશ્ચ યથા સદા ।
સર્વજ્વરભયં છિન્ધિ સર્વજ્વરભયં છિન્ધિ ॥ ૧૮॥

સર્વગ્રહભયં છિન્ધિ સર્વગ્રહભયં છિન્ધિ ।
સર્વશત્રૂન્નિવક્ત્યાપિ સર્વવ્યાધિનિવારણમ્ ।

રુદ્રલોકં સગચ્છતિ રુદ્રલોકં સગચ્છત્યોન્નમ ઇતિ ॥

॥ ઇતિ (શ્રીસ્કન્દપુરાણે?) દુર્વાસઃ પ્રોક્તં રુદ્રકવચં સમ્પૂર્ણમ્ ॥

Although this is said to be from Skanapurana,
we do not know its location in print.

Encoded and proofread by K . Sree Hari, Ruma Dewan

---

*Rudrakavacham*

pdf was typeset on January 13, 2024

Please send corrections to *sanskrit@cheerful.com*